# श्रीमद्भगवद्गीता-साङ्ख्यनिष्ठायाः भारतभावदीपशाङ्करभाष्ययोःदिशा विवेचनम्

# Shrimadbhagvadgita-saankhyanishthaayah bharatabhavdeepshankarbhashyayoh disha vivechanam

**शन्तनुः अयाचितः**

**Shantanu: Aayachitah:**

रामकष्णमिशन् विवेकानन्दशैक्षणिकशोधसंस्थानम्, बेलूड मठः, हाओडा.

Ramakrishna Mission Vivekananda Educational Research Institute, Belur Math, Howrah.

Corresponding author email: shantanuc@gm.rkmvu.ac.in

**सारांश**

अस्मिन् शोधपत्रे शोधकर्त्रा श्रीमद्भगवद्गीतायां विद्यमानस्य साङ्ख्ययोगाध्यायस्य चिन्तनं भारतभावदीपशाङ्करभाष्ययोः आधारेण कृतं वर्तते। तत्रैव समग्रमहाभारतस्य व्याख्यातुः मतानुसारं साङ्ख्ययोगस्य वर्णनम्, कथञ्च अद्वैतवादमते साङ्ख्ययोगवर्णनम् इति विषयः समीक्षितः वर्तते।

**मुख्यशब्दाः** – श्रीमद्भगवद्गीता, साङ्ख्यशास्त्रम्, भारतभावदीपः, शाङ्करभाष्यम्

In this paper, the researcher has reflected on the chapter on Sankhya Yoga in Srimad Bhagavad Gita on the basis of the commentaries of Bharata Bhavadeep and Shankara. There, the description of Sankhya Yoga according to the interpreter of the entire Mahabharata, and how the description of Sankhya Yoga according to Advaita, is reviewed.

**Keywords**: Srimad Bhagavad Gita, Sankhya Shastra, Bharata Bhava Deep, Shankara Bhashya.

### १. श्रीमद्भगवद्गीतायां साङ्ख्ययोगः

श्रीमद्भगवद्गीता ग्रन्थे साङ्ख्ययोगस्य वर्णनं द्वितीये अध्याये उपलभ्यते। अस्मिन् अध्याये भगवता कृतः गीतोपदेशः अर्जुनस्य तत्सदृशस्य सरलमतेः कस्यापि वा मनुष्यस्य हठादेव "अहमेषां मम एते"[i] इति भावनया भ्रान्तिं गतस्य अज्ञानदावानलदाहसमर्थ इति विद्वन्मतयः गदन्ति।

गीताशास्त्रं भगवतो मुखारविन्दान्निःसृतं, न वेदादीनामिव निःश्वासमात्रमिति तस्य वैलक्षण्यं सुतरां वरिवर्ति। यदार्जुनः "शिष्यस्तेहं शाधि मां त्वां प्रपन्नमिति"[ii] आह तदा परमकरुणया आप्लावितो भगवान् अर्जुनं मोहसागरात् समुद्दिधीर्षुः, तमेव च निमित्तिकृत्य अस्मान् अपि उद्दिधीर्षुः गीताशास्त्रं वेणुनादमिव मधुरं निनादयन् गीतवान् इति भक्तचित्तसंशोधकं गीताशास्त्रं राजते। तत्र अपि मोक्षस्य राजमार्गः साङ्ख्ययोगः अतितरां समुल्लसति। अहं मम इति भ्रान्तेः बाधकं, मोहनिवारकं यत् पारमार्थिकं ज्ञानं, नाहं कर्ता, भोक्ता अपि तु असंसारी नित्यसच्चिदानन्दस्वरूपः इति आकारकं तत् साङ्ख्यमिति निश्चयः। ईदृशे ज्ञाने सति मनुष्यस्य आत्मज्ञानात् मुक्तिरिति मुक्तावस्थाप्राप्तिः शास्त्रोक्ता अचिरेणैैव सिद्ध्यति। यावत् ज्ञाननिष्ठायोग्यता न जायते तावत् कर्माणि प्रकृत्यैव जायन्ते इति अविज्ञाय सर्वोपि कर्ताहमस्मि इति अनुभवति। यः कर्माभिमानवान् न भवति तस्य कर्माणि प्रकृत्यैव जायन्ते इति अभिज्ञानकारणात् कर्माणि बन्धकारणानि न भवन्ति। अत एव कर्माभिमानरहितस्य, विशुद्धचेतसो मोक्षफलसिद्धिहेतुः यः चिद्भावः स साङ्ख्ययोग इति

वदन्ति। ईदृशी साङ्ख्यनिष्ठा यस्य सिद्धा तस्यैव सर्वकर्मपरित्यागपूर्वके भिक्षाटनादौ अधिकारः, नान्यस्य। तस्मात् अर्जुनेन यत् भिक्षाशनादिना जीवनधारणं प्रार्थितमासीत् तस्य सर्वस्यापि क्षात्रधर्मपरित्यागेन कर्तुमिष्टस्य जीवनधारणस्य यः हेतुः, सः आत्मसंबन्धिषु जनेषु विद्यमानो अहं ममेति भावः तज्जनितौ शोकमोहौ च। न तु साङ्ख्यनिष्ठा। अथापि भिक्षाशनादिना जीवनधारणम्, अहिंसा इत्यादिकं यत् साङ्ख्यानां सर्वभूतेषु आत्मैकत्वं प्राप्तानां यथा उचितं प्रशस्तमिति शास्त्रसिद्धान्तः, तद्गतं सार्वात्म्यदर्शनं विहाय भिक्षाटनादिविषये एव आसक्तिं दर्शयता अर्जुनेन, प्राज्ञानां वाक्यानि ब्रुवता च विलक्षणं वैदुष्यं स्वस्मिन् विद्यते इति प्रदर्शितम्। एतदपि अनुचितमिति विजानता भगवता अर्जुनस्य द्विविधस्य अपि मोहस्य, स्वेषु अहं ममाभिमानरूपस्य मोहस्य, स्वधर्मः युद्धमेव अधर्म इति चिन्तितस्य द्वितीयस्य च मोहस्य निवारणाय साङ्ख्ययोगविषयकः अशोच्यान् अन्वशोचस्त्वमिति आरम्भः कृतः वर्तते।

भगवद्गीतायाम् अशोच्यानित्यारभ्य भगवता विंशतिश्लोकैः साङ्ख्यनिष्ठायाः प्रतिपादनं कृतं वर्तते। तद्विना मोहापगमस्य अशक्यत्त्वात्। अत एव साङ्ख्ययोगाध्यायगतानां अशोच्यानित्यादिना[iii] आरब्धानां तस्माद्युद्ध्यस्व भारत।[iv] इत्यन्तानां श्लोकानामर्थविचारेण साङ्ख्यनिष्ठामवगच्छामः।

**२. भारतभावदीपे साङ्ख्ययोगः**

भगवतः नीलकण्ठाचार्यस्य समग्रस्यापि महाभारतग्रन्थस्य व्याख्यातुः गीताशास्त्रव्याख्यानं, दार्शनिकानां पूज्यानां भगवत्पादानां च व्याख्यानं यद्यपि समानं सिद्धान्तमाश्रित्य वर्तते अथापि व्यख्यानशैलीभेदः, भगवत्पादानां विषये विद्यमानः नीलकण्ठाचार्याणामादरः सर्वमपि अत्यन्तं स्तुत्यं वर्तते। तस्मात् भगवत्पादपरवर्तिभिः नीलकण्ठाचार्यैः प्रस्थानत्रयशाङ्करभाष्यस्थाद्वैतसिद्धान्तस्य दृढत्वं तावत् पञ्चमवेदत्वेन प्रसिद्धस्य महाभारतस्य भारतभावदीपाख्यटीकाविरचनद्वारेण साधितमिति भवयामः। भगवद्गीतायाः नीलकण्ठीये भारतभावदीपे विद्यमानं साङ्ख्ययोेगस्य वर्णनम् अतीव दीर्घं वर्तते अथापि तत्र विद्यमानान् शाङ्करभाष्यातिरिक्तान् कतिपयान् अष्टसु श्लोकेषु समधिगतान् विषयान् अत्र प्रकाशयामः।

अशोच्यानन्वशोचस्त्वमित्यादि श्लोके जीवापेतं वाव किलेदं म्रियते[v] इति श्रुतिमवतार्य भीष्मादीनां नित्यत्वं स्थापितं वर्तते। गतासून् इति पदे असुशब्दः प्राणाभिधः वर्तते। तस्य ग्रहणात् देहापेक्षया प्राणानां महत्त्वमिति वेदार्थः "प्राणो ह पिता प्राणो माता"[vi] इति श्रुत्या दृढीकृतं वर्तते। प्रज्ञावादशब्दे पण्डितानाम् अवादान् इति तार्किकव्याख्यानस्य निषेधश्च कृतः अस्ति।

ततश्च न त्वेवाहं जातु नासम्[vii] इति श्लोकेन देहानां भेदे सत्यपि आत्मा एक एव, नित्यश्च इति प्रोक्तं वर्तते। देहस्य अनात्मत्वे तत्पीडाद्यनुभवः अक्षवदभिमानमात्रादिति अध्यासपोषकदृष्टान्तेन देहादेरनात्मत्वं निश्चितमुक्तं वर्तते। देहस्तु प्राक्कर्मानुगुणं गच्छति। इति चोक्तम् अस्ति।

देहिनोस्मिन् इति श्लोकेन इष्टदेहवियोगजः शोको भवति एव इति आशङ्क्य बाल्यादि अवस्थाभेदे सत्यपि आत्मनः एकस्यैव स्थूलदेहे अनुवर्तमानस्य यथा बाल्यशरीरापगमे दुःखं न भवति। तथैव स्थूलशरीरात् शरीरान्तरप्राप्तिः अपि आत्मनः दुःखहेतुः न भवति। सूक्ष्मशरीरी एव आत्मा विविधानि मनुष्यतिर्यगादिशरीराणि लभते। इत्येतत् तथ्यं दृष्ट्वा धीराः शोकं न कुर्वन्ति। एक एव आत्मा इति द्योतयितुं प्रकृतश्लोके देहि इति प्रयोगः कृत इति , पूर्वश्लोके बहुवचनं तावत् उपाध्यभिप्रायेण इति अत्र नीलकण्ठाचार्याः स्पष्टं प्रदर्श्य आत्मनः उपाधित्वेन बहुत्वे, स्वरूपतश्च एकत्वे श्रुतिः प्रमाणयन्ति।[viii] यथा ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्. उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा।। इति। एकत्वादेव आत्मनः विभुत्वमपि सिद्ध्यति।

आत्मा लिङ्गशरीरात् भिन्नः इति सिद्धे अपि आत्मनः दुःखानुभवः जायते एव। अत एव अनुभवजन्यज्ञानेन दुःखादीनामाश्रयः आत्मा इति वदामश्चेत्, ततश्च भीष्मादीनां बन्धूनां नाशनिमित्तं दुःखमनिवार्यमिति आयाति। एतादृशी आशङ्का अत्र नीलकण्ठाचार्यैः

प्रदर्शिता। तस्याः च वारणोपायः मात्रास्पर्शास्तु इति श्लोकेन प्रोक्तः। अत्रायं विशेषः - प्रमातुः प्रमाणद्वारा प्रमेयेण सम्बन्धाः सर्वे अपि अनित्याः अत एव सुखदुःखादयः अपि अनित्या एव। तस्मात् सोढव्यास्ते इति विवक्षितं वर्तते।अत्र प्रोक्तं यत् सुप्तिसमाधौग्रहावेशे सति यद्यपि अयमनर्थः प्रमातृत्वलक्षणः न भासते, तथापि जाग्रत्स्वप्नयोः स भासते एव। अतः अस्मिन् प्रसङ्गे कादाचित्कं भानमालक्ष्य अध्यासमवतारयति नीलकण्ठाचार्यः - अध्यासलक्षणं प्राह – यद्धि यत्राभेदेन कदाचित्भाति तत्तत्राध्यस्तं रज्वामिव सर्पः।[ix] प्रमात्रादिकं च आत्मनि कदाचिदेव प्रतिभासते अतस्तन्मिथ्या। प्रमातृत्वादिकमेव मिथ्या चेत् प्रमातृत्व सम्बन्धेन सम्प्राप्तं दुःखादिकं तु सुतरां मिथ्या एव न तस्यात्मनि कथञ्चिदपि प्रसक्तिः। दुःखित्वप्रत्ययस्तु तादात्म्याध्यासादिति निश्चयः। अत एव तितिक्षा कर्तव्या इति अभिप्रायः प्राप्तः।

तितिक्षाफलम् अमृतत्वयोग्यत्वमिति प्रोक्तम्। जाग्रति, स्वप्ने, असम्प्रज्ञातसमाधौ वा मात्रास्पर्शाः यं न व्यथयन्ति। स पुरुषः मोक्षयोग्यो भवति इति भावः।

सुप्तिसमाध्यादौ देहभावस्य राहित्ये अपि जाग्रत्स्वप्नयोः तत् सत्त्वात्, तप्तायःपिण्डस्य दग्धृत्वमिव दुःखित्वं जाग्रत्स्वप्नयोः दुर्वारम् इति आशङ्का अत्र निरूपिता वर्तते। वस्तुतः अध्यासः तप्तायःपिण्डदृष्टान्तेन निरूप्यते। किन्तु अत्र पूर्वपक्षः तेनैव दृष्टान्तेन दृढीकृत इति विशेषः[x] वर्तते। ततश्च सर्वोपि उपाधिः मूलप्रकृतेः व्यापकत्वात् तस्याः मात्रारूप एव तस्मादपि उपाधेः निर्मूलं विनाशः नाभ्युपगन्तुं शक्य इति वदन् आचार्यः उपाधिसहितत्वमात्मनः नित्यमिति संसाध्य पूर्वपक्षं द्रढयति। इदमत्र आचार्यस्य निरूपणकौशलं विशिष्यते। अयं सर्वोपि विचारः नासतो विद्यते भाव इति श्लोकार्थव्याख्यानात् प्रागागतो वर्तते। ततश्च शङ्कानिरासाय नासतो इत्यादि विचारः प्रारब्धः। असतो नाम मिथ्याभूतस्य भावः कदाचिदपि न विद्यते इति कथयता भगवता प्रमात्रादिकानां मूलाज्ञानेन कल्पनमेव कृतं वर्तते इति सूचितम्। आत्मज्ञानेन मूलाज्ञाननिवृत्तौ पुनः प्रमातृत्वादीनामुद्भवो न जायते।

अत्रैव अप्रतीतिमात्रत्वं मिथ्यात्वं वा इति उक्त्वा, आत्मनोपि अप्रतीयमानत्वात् मिथ्यात्वमस्तु अथवा उभयोरपि आत्मानात्मनोः अप्रतीयमानत्वादेव समानता इति द्वयोरपि सत्यत्वमस्तु इति पक्षमादाय विचारः कृतः दृश्यते। अत्र अप्रतीयमानत्वमेव हेतुत्वेन उपन्यस्य कृतः आक्षेपः अत्यन्तं विशेषं गमयति। पुनश्च अयमत्रान्यो विशेषो। सुषुप्तादुत्थितस्य अनुभवपरामर्शात् तत्रापि सतः अस्तित्वम् सत्वम् अस्ति एव। अत्र श्रुतिमपि प्रमाणयति। यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्नतु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् इति।[xi]

अन्तशब्दस्य याथात्म्यमिति अर्थः नीलकण्ठाचार्यैः प्रोक्तः वर्तते। स्वप्नपदार्थाः यथा जाग्रद्बोधेन बाध्यन्ते, तथैव जाग्रद्दृष्टा अपि तत्वज्ञानेन बाध्यन्त एव।

विशेषाशङ्का - रजतादिकं स्वरूपतो सद्रूपमेव भ्रमे अवभासते न तु स्वरूपेण असत् शशश्रृङ्गादिकम् इति।
समाधानम् - अध्यासे पूर्वानुभवमात्रमपेक्षते इति ब्रूमः। न तु वस्तुनः सत्त्वमपि। अतः दर्पणे प्रतिबिम्बिते नभसि अपि नैल्यारोपः भवति। नैल्यमसदेव सत् आरोप्यत इति।
अतः सतः ज्ञानमसतः बाधं जनयति। तदेव च ज्ञानं कैवल्यहेतुः भवति इति स्पष्टम्।

अविनाशि तु इति आरम्भः सतः सत्वे किं मानम् इति आशङ्का निवृत्तये जातः अस्ति। समाधानं तावत् येन सता इदं सर्वमपि ततं व्याप्तं वर्तते तत् सत् अविनाशि इति विद्यात्। अत्र विनाशो नाम पूर्वावस्थापरित्यागः। एतमेव विषयं विचारयता नीलकण्ठाचार्येण

अत्र परिणामविवर्तोपादनकारणयोः विचारः विहितः दृश्यते।श्रुतयश्चात्र उद्धृताः यथा- अजायमानो बहुधा विजायते जात एव न जायते को न्वेनं जनयेत्पुनः।[xii]

ततश्च कश्चिदपि आत्मनो विनाशं न कर्तुमर्हति इत्यत्र अन्यस्य विनाशहेतोरभावं वदन् आचार्यः- द्वितीयाद्वै भयं भवति[xiii] इति श्रुतेः प्रामाण्यं प्रादर्शयत्।

अन्तवन्त इति श्लोके तु आत्मनः सत्त्वं, तदतिरिक्तस्य असत्वं प्रतिपादयता भगवता नित्यानित्यविचारस्योपसंहारः कृत इति गम्यते। अस्मिन् श्लोके आत्मा अप्रमेय इति ज्ञायते। अतः प्रमाणाविषयत्वमात्मनः भगवता निरूपितम्। तत्रापि श्रुतिं प्रमाणयन्ति आचार्याः - तद्यथा - एतदप्रमयं ध्रुवम् इति। अप्रमयमित्यस्याप्रमेयमित्यर्थः। आत्मनि अप्रमेयत्वं निरूप्य प्रमाणानां प्रसरः तस्मिन्न जायते इति विषयमपि श्रुत्या प्रमाणयन्ति- येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयात् इति।[xiv]

विशिष्टः श्लोकः अपि अत्र आचार्यैः समानीतः वर्तते -
प्रमाणमप्रमाणं च प्रमाभासस्तथैव च। यत्प्रसादात्प्रसिध्यन्ति तदसंभावना कुतः।।[xv] इत्थमत्र अष्टभिः श्लोकैः साङ्ख्यनिष्ठा प्रतिपादिता। ततश्च शाङ्करभाष्यदिशा आपाततो चिन्तयामः।

### ३. शाङ्करभाष्ये साङ्ख्ययोगः

शङ्करभगवत्पादैः आरम्भे पीठिकाभाष्ये एव गीताशास्त्रं शोकमोहादेरज्ञानस्यनिवर्तकं वासुदेवस्वरूपग्राहकञ्च इति स्पष्टं प्रोक्तं वर्तते। ततश्च तैः साङ्ख्ययोगाध्यायारम्भे एव ज्ञानकर्मसमुच्चयवादमुत्थाप्य तमःप्रकाशयोरिव अत्यन्तं विरुद्धं तत्वं समुपन्यस्तं वर्तते। गीतासु केवलात् ज्ञानादेव मुक्तिः प्रतिपादिता इति च आचार्यैः पौनःपुन्येन न्यगादि।

अशोच्यानिति श्लोके तु शोकसागरे निमग्नस्योद्धारः कथञ्चिदपि आत्मज्ञानव्यतिरिक्तेन साधनानुष्ठानेन कर्मणा वा न भवितुमर्हति इति पश्यता भगवता आत्मज्ञानसाधननिरूपणदक्षेन अशोच्यानित्यादि श्लोकेन परमार्थतो नित्यभूतानां भीष्मादीनां मरणम् आशङ्क्य शोकं कुर्वाणस्य अर्जुनस्य मूढः असि इति निन्दनं भगवत्पादैः कृतं वर्तते।न त्वेवाहमिति श्लोकार्थस्तावत् त्रिष्वपि कालेषु आत्मस्वरूपेण सर्वे भवामः इति कारणात् अशोच्याः भीष्मादय इति बोधयति।

आत्मनः नित्यत्वं तु देहे यथा बाल्यकौमार्ययौवनवार्धक्यावस्थासु सत्स्वपि आत्मनः अविकृतत्वं भवति तस्मात् देहान्तरप्राप्तावपि इति दृष्टान्तेन आत्मनः अविकारित्वं साधयित्वा, अविकृतत्वादेव निश्चित्य देहिनोस्मिन् इति श्लोके प्रोक्तं वर्तते। मात्रास्पर्शाः इन्द्रियाणां विषयैः सह सम्बन्धा, शीतोष्णादिफलप्रदाः अनित्याः अतः शीतोष्णादीनां सहनं कर्तव्यमिति उपदेशः मात्रास्पर्शास्तु इत्यत्र कृतः वर्तते। तत्फलं च अव्यथमानः सुखदुःखयोः प्राप्तौ समानः मोक्षाय कल्पते, समर्थो भवति इति द्वन्द्वसहिष्णुतायाः फलं प्रोक्तं वर्तते।

नासतो विद्यते भाव इति श्लोकेन बुद्धेः सदसद्रूपेण द्वैविध्यं प्रतिपाद्य सदसतोः बुद्ध्योः मध्ये सद्बुद्धिः सर्वदा अनुवर्तमाना अव्यभिचारीणी, असद्बुद्धिस्तु सर्वदा परिवर्तमाना व्यभिचारिणी इति दर्शितं वर्तते। अद्वैतसिद्धान्तरीत्या द्वन्द्वभूतस्य शीतोष्णादेः मिथ्यात्वं प्रोक्तं वर्तते। तच्च तत्त्वदर्शिनां दृष्टया सिद्धं भवति। यत् सत् सर्वदा सर्वकालेषु अस्ति इति उच्यते। तस्य किं स्वरूपमिति स्वरूपनिर्देशः अविनाशि तु तद्विद्धि इति श्लोकेन कृतः अस्ति।

वस्तुतः अप्रमेयः आत्मा, केनापि प्रमाणेन अगम्यः इति प्रोक्ते सति, आत्मनि प्रमाणमागम इति कथितस्य आगमस्य प्रामाण्यमपि आशङ्का विषयः इति जायते। अतः तत्र स्पष्टं कृतं यत् आगमप्रमाणं तावत् अज्ञाननिवृत्तिद्वारेणैव प्रमाणं भवति। न तु

वस्तुस्वरूपनिदर्शकत्वेन अतः आगमादेः प्रामाण्यमपि आरोपनिवर्तकत्वेन इति स्थिरं भवति। अत्र भगवत्पादमतेनापि न युद्धं कर्तव्यतया अत्र विहितमपि तु नित्य आत्मा इति बुद्ध्वा तद्विनाशमालोच्य युद्धादुपरमं मा कार्षीरिति एव उक्तं भवति। शोकेन युद्धादुपरमणं मा कुरु इति भगवदभिप्रायः। अयं स्वाभाविकतया प्रवृत्तस्य प्रवृत्तेः अनुवाद एव।

### ४. विवेचितविषये भारतभावदीपशाङ्करभाष्ययोः समीक्षा

अद्यावधि अस्माभिः नीलकण्ठीयशाङ्करभाष्ययोः दिशा भगवद्गीतायां प्रोक्तस्य साङ्ख्ययोगस्य विचारः कृतः वर्तते। अत्रैते विशेषाः भवन्ति-

- शङ्करभगवत्पादीयं भाष्यं तावत् द्वितीयाध्यायस्य एकादशश्लोकात् प्रारभ्यते। किन्तु नीलकण्ठप्रणीतं भारतभावदीपाख्यं व्याख्यानं समग्रस्यापि महाभारतस्य वर्तते अतः तेषा निरूपणं प्रतिपात्रदृष्ट्या विवेचनं प्राप्नोति इति विशेषः। तच्च समग्रस्यापि गीताशास्त्रस्यास्ति इति विशेषः वर्तते।
- भगवत्पादानां तावत् अद्वैतत्वनिरूपणपरता वर्णाश्रमधर्मलक्षणस्य निवृत्तिलक्षणस्य च धर्मस्य बोधकता विशेषतो अवगम्यते। किन्तु नीलकण्ठाचार्याः यद्यपि भगवत्पादानामनुवर्तिन अव अथापि तेषां निरूपणं भगवत्पादानामपेक्षया विशिष्टां शैलीमादधत् वरीवर्ति। तादृशीं शैलीं वयं समीक्षाकाले अधुनात्रैव क्वचित् क्वचित् दर्शयिष्यामः।
- शोकसागरे निमग्नस्य अर्जुनस्यात्मज्ञानादतिरिक्तमुद्धारसाधनं नास्ति इति पश्यता भगवता, अशोच्यानित्यारम्भः कृत इति भगवत्पादाः। किन्तु अर्जुनस्य देहनाशे आत्मनाशः, युद्धः स्वधर्मः सन्नपि अधर्मः इति मोहद्वयं प्राप्तायाः बुद्धेः आद्यं मोहं विनाशयितुं 11 तः 30 श्लोकसङ्ख्यां यावत् परमार्थतत्वनिरूपणं कृतमिति नीलकण्ठाचार्याः प्राहुः। इदमत्र निरूपणवैशद्यं नीलकण्ठाचार्याणां दृश्यते।
- भगवत्पादाः गीताव्याख्यानकाले प्रायः श्रुतिमाश्रित्य विचारं न कृतवन्तः। क्वचित् काठकोक्तां श्रुतिम् आनीनाय भगवान् इत्येवमाहुः, किन्तु मुखतः तैः श्रुतिकथनं, गीताभाष्ये निबन्धनं वा न विहितम् अतः, श्रुतिमनुद्धृत्य एव गीताभाष्यं कृतमिति भाष्यकृच्छैली संराजते। किन्तु विशेषतः नीलकण्ठाचार्यैः तत्र तत्र सति सम्भवे, श्रुतीनां समानयनम्, सम्भवे सति क्वचित् दृष्टान्तं दत्त्वा श्लोकार्थविस्तारसम्पादनं, अन्येषां कुतर्कपराणां दर्शनिकानां गीताश्लोकव्याख्यानव्याजेन खण्डनमित्यादयो मार्गा बहुधा समाश्रिताः दृश्यन्ते।
- अशोच्यानित्यत्र एव जीवापेतं वाव किलेदं म्रियते।, प्राणो ह पिता प्राणो माता इत्येवं श्रुतिवाक्यानि आश्रित्य विवेचनं कृतं वर्तते।
- अनुमानप्रमाणेन अपि तत्रैव आत्मनः देहादन्यत्वं साधितं वर्तते। तद्यथा – आत्मा देहादन्यः चेतनत्वात्, व्यतिरेकेण घटवत्। देहस्यापि चेतनत्वापत्तौ, देहो न चेतनः दृश्यत्त्वात् घटवत् इत्यादिरूपेण अनुमानं उपयुज्य देहाहीनां दृश्यत्वात् घटादिवत् अचेतनत्वं साधितं वर्तते। अतः नीलकण्ठाचार्याणां निरूपणशैली अनेकसाधनसामग्रीयुता दृश्यते।
- प्रतिश्लोकं शङ्कां समुत्पाद्य समाधानं कुर्वन्ति एव नीलकण्ठाचार्याः, तदा तेषां निरूपणेन अद्वैतशास्त्रविषये अस्माकं श्रद्धा प्रतिक्षणं वर्धमाना भवति इति विशेषः। यथा देहपीडया आत्मा असङ्गः कथं पीड्यते इति शङ्कायां प्रोक्तं यत्, यक्षादीनां यथा देहाभिमानः सुखदुःखपीडादि जनकः तद्वदिति अत्र समाधानं प्रोक्तं वर्तते। देहाभिमानवत एव पीडाद्यनुभव इति। अशरीरवतः आत्मनः सुखदुःखसंस्पर्शाभावः द्योत्यते।
- नीलकण्ठाचार्याः विभिन्नशास्त्रगतान् दृष्टान्तानीय विषयं स्थापयन्ति। तच्च मनोहरतां गच्छति। तद्यथा – कौलिकशास्त्रप्रसिद्धमेतत् इति वदन्तः आचार्याः प्रतिमायाः कण्टकवेधनेन देवदत्तो व्यथते इत्यत्र देवदत्तशरीरसम्बन्धी कण्टकवेधनं नास्ति। न च धातुवैषम्यादिनिमित्ता पीडा देवदत्ते अस्ति। अतः प्रतिमायाः पीडनेन जायमानं देवदत्तदुःखं पूर्वकर्मजमेव इति निश्चिन्वन्ति। तस्मात् शास्त्रान्तरप्रसिद्धदृष्टान्तप्रदानकौशलं नीलकण्ठश्रीचरणानां महत् वर्तते।

- भगवत्पादैः श्लोकार्थनिरूपणं कृतम् किन्तु पूर्वोत्तरश्लोकयोः भेदः इत्थं निरूपितो भवति इत्येवमाकारिका शैली तेषां न विद्यते। अथापि नीलकण्ठाचार्याः तावत् अशोच्यानिति श्लोके आत्मनः देहादन्यत्वं प्रोक्तम् । अस्मिन् श्लोके तु सूक्ष्मशरीरविशिष्टस्य व्यवहारदृष्ट्या नित्यत्वं साधितमिति श्लोकार्थयोरपि क्वचित् भेदं गमयन्ति।

**५. उपसंहारः**

भारतभावदीपशाङ्करभाष्ययोः आधारेण साङ्ख्ययोगस्य आपातवर्णनं कृतं वर्तते। अत्र समीक्षाकाले द्वयोरपि आचार्ययोः निरूपणविवेचनादिविषयकः भेदः अस्माभिः निरूपितः वर्तते। तेन यथा भगवत्पादीये गीताभाष्ये अस्माकं प्रवृत्तिः जायते तथैव आनन्दजनके नीलकण्ठीये अपि मतिमतां प्रवृत्तिः जायतात् इति भावये। यतो हि समग्रमहाभारतव्याख्यातुः वैभवं प्रतिश्लोकं वयमनुभवितु शक्नुमः। तेनैव सह भगवत्पादानां विषये समादरं च प्राप्नुमः। इति शम्।

**उपयुक्तग्रन्थसूची**

[1-4, 6] गोयन्दका, श्रीकृष्णहरिदास. (वि.सं. १९८८), श्रीमद्भगवद्गीता शाङ्करभाष्य हिन्दी अनुवाद सहित, गीताप्रेस, गोरखपुर.

[5-6] छान्दोग्योपनिषद् (सानुवाद शाङ्करभाष्यसहित), (वि.सं. २०५२), गीताप्रेस, गोरखपुर.

[9-10] किंजवडेकर, रामचन्द्रशास्त्री. (सं.पा)(१९३१), श्रीमन्महाभारतम्। तृतीयभागे-भीष्मपर्व। चतुर्धरवंशावतंसश्रीमन्नीलकण्ठविरचितभारतभावदीपाख्यटीकया समेतम्।, चित्रशाला प्रेस, पुण्यपत्तनम्।

[11] M ādhavānanda, Swami. (Ed.) (1950), The Bṛhadāraṇyaka Upaniṣad With The Commentary Of Śaṅkarācārya, Advaita Ashrama, Almora.

---

i भ. गी. शा. भा. पृ - २६

ii भ. गी. २. ७

iii भ. गी. २.११

iv भ. गी. २.१८

v छा. उ. ६.११.३

vi तत्रैव ७.१५.१

vii भ. गी. २.१२

viii पूर्वश्लोकयोर्गतासूनिति वयमिति च बहुवचनं उपाधिभेदाभिप्रायम् अत्र तु देहिन इत्येकवचनमुपधेयचिदात्मैक्याभिप्रायमिति ज्ञेयम्। तथा च श्रुतिरेकस्यात्मन औपाधिकं भेदमाहयथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा इति। क्षेत्रेषु वक्ष्यमाणलक्षणेषु स्थूलसूक्ष्मदेहद्वयात्मकेषु।एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा इति च। एकत्वाच्च विभुत्वमप्यस्य सिद्धम्। तेन देहादीनामनित्यानामविभूनां च पराभिमतमात्मत्वं प्रत्याख्यातं वेदितव्यम्।

ix यद्धि यत्राभेदेन कदाचिद्भाति तत्तत्राध्यस्तं रज्ज्वामिव सर्पः। भ. गी. भा. भावदीप. २.१४

x ननु सुप्तिसमाध्यादौ त्यक्तोपाधेरात्मनः समदुःखसुखत्वेऽपि सोपाधिकदशायां तप्तायःपिण्डस्य दग्धृत्वमिव तस्य दुःखित्वं दुर्वारम्। तत्रैव २.१६

xi बृ. उ. ४.३.२३

xii तै. आ. ३.१३

xiii बृ. उ. १.४.२

xiv बृ. उ. २.४.१४

xv भ. गी. भा. भावदीप. २.१८